यहाँ से काटिए

Sl.No. :

नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – 22

No. of Printed Pages – 7

VU–94–Sans. Vangmay

# वरिष्ठ उपाध्याय परीक्षा, 2024

## संस्कृत वाङ्मय (अनिवार्यः)

**समय** : 3 **घण्टे** 15 **मिनट (सपाद होरात्रयम्)**

**पूर्णांक** : 80

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामांङ्काः अनिवार्यतः लेख्याः ।

2) सर्वे प्रश्नाः अनिवार्याः ।

3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीयाः ।

5) सर्वे प्रश्नाः संस्कृतमाध्यमेन उत्तरणीयाः ।

यहाँ से काटिए

## खण्डः – 'अ'

**1) वस्तुनिष्ठप्रश्नाः** **[15 × 1 = 15]**

i) ''दित्यदित्यादित्य पत्युत्तर पदाण्य्ः'' इति सूत्र मस्ति – **[1]**

अ) विधिसूत्रम् ब) गणसूत्रम्

स) संज्ञासूत्रम् द) अधिकार सूत्रम्

ii) भिक्षाणां समूहो भवति – **[1]**

अ) भेक्षम् ब) भिक्षार्थी

स) भैक्षम् द) समूहभैक्षः

iii) ''रैवतिकः'' इत्यत्र ठस्य स्थाने आदेशो भवति – **[1]**

अ) एव ब) ईक

स) इन द) इक

iv) तिङःशितश्च किं सञ्ज्ञकाः? **[1]**

अ) सार्वधातुक सञ्ज्ञकाः ब) आर्धधातुक सञ्ज्ञकाः

स) लकार सञ्ज्ञकाः द) विधि सञ्ज्ञकाः

v) लेट्लकारः प्रयुज्यते – **[1]**

अ) भविष्यकालार्थे ब) लोके

स) छन्दसि (वेदे) द) सर्वत्र

vi) ''अभिनव बाणः'' नाम्ना कः सुप्रसिद्धः? **[1]**

अ) कालिदासः ब) भासः

स) अम्बिकादत्त व्यासः द) बाणभट्टः

vii) शिववीरः कीदृशः नायकः? **[1]**

अ) धीरोद्धतः ब) धीरोदात्तः

स) धीरललितः द) धीरप्रशान्तः

viii) के न्याय्यात्पथः पदं न प्रविचलन्ति? [1]

अ) धीराः ब) नीतिनिपुणाः

स) अधीराः द) दुष्टाः

ix) परमगहनः सेवाधर्मः केषाम् अगम्यः विद्यते? [1]

अ) नराणाम् ब) योगिनाम्

स) नारीणाम् द) शिक्षकाणाम्

x) आचार्यस्य पत्नी विद्यते। [1]

अ) आचार्याणी ब) आचार्या

स) उपाध्यायी द) आचार्यानी

xi) भगिन्याः नाम विद्यते। [1]

अ) स्वसा ब) ननन्दा

स) नप्त्री द) आत्मजा

xii) दुहितुः पत्युः नाम किम्? [1]

अ) भागिनेयः ब) पितृव्यः

स) श्वसुरः द) जामाता

xiii) प्रथमा–षष्ठी–एकादशी तिथीनां सञ्ज्ञा भवति। [1]

अ) भद्रा ब) रिक्ता

स) नन्दा द) जया

xiv) पञ्चाङ्गे प्रथमम् अङ्गम् भवति – [1]

अ) वारम् ब) तिथिः

स) नक्षत्रम् द) योगः

xv) ज्योतिषशास्त्रानुसारं ब्रह्माण्डे कति ग्रहाः सन्ति? [1]

अ) नव ब) एकादश

स) दश द) द्वादश

**2)** रिक्तस्थानानि पूरयत – **[7 × 1 = 7]**

i) आयनेयीनीयियः .............. प्रत्ययादीनाम्। **[1]**

ii) क्रमादिभ्यो .........। **[1]**

iii) आशिषि .............। **[1]**

iv) शिवराजविजये .......... विरामाः सन्ति। **[1]**

v) रे रे चातक ! ........ मित्र ! क्षणं श्रूयताम्। **[1]**

vi) वीर पत्नी वीरभार्या ............ तु वीर सूः। **[1]**

vii) रविः सोमस्तथा ......... गीष्पतिरेव च। **[1]**

**3)** अतिलघूत्तरात्मकाः प्रश्नाः **[10 × 1 = 10]**

i) ''आश्वपतम्'' इत्यत्र अण् प्रत्ययः केन सूत्रेण भवति? **[1]**

ii) ''शौल्कशालिकः'' इत्यत्र ''ठगायस्थानेभ्यः'' सूत्रेण कः प्रत्ययः भवति? **[1]**

iii) विधिनिमन्त्रणादिष्वर्थेषु कःलकारः भवति? **[1]**

iv) ''शिवराज विजय'' – उपन्यासस्य नायकः कः? **[1]**

v) खलसज्जनानां मैत्री कीदृशी भवति? **[1]**

vi) पद्माकरं कः विकचीकरोति? **[1]**

vii) पुत्रस्य नाम द्वयं लिखत। [1]

viii) ''अनुजः – अग्रजः'' अर्थे को भेदः? [1]

ix) कति ऋतवः भवन्ति? नामानि लिखत। [1]

x) कति नक्षत्राणि भवन्ति? [1]

## खण्डः – 'ब' [12 × 2 = 24]

4) ''औत्सः'' इति रूपं साधयत। [2]

5) ''गार्ग्यायणः'' इति रूपं साधयत। [2]

6) ''शिक्षकः'' इति रूपं साधयत। [2]

7) ''भविष्यति'' इति रूपं साधयत। [2]

8) ''बभूव'' इति रूपं साधयत। [2]

9) ''लुटः प्रथमस्य डारौरसः'' इति सूत्रं व्याख्येयम्। [2]

10) शिववीरस्य विषये पञ्चवाक्यानि लिखत। [2]

11) नीतिशतककारास्य कृतित्वविषये पञ्चवाक्यानि लिखत। [2]

12) मनुष्यस्य चत्वारि नामानि लिखत । [2]

13) स्त्रियः चत्वारि नामानि लिखत । [2]

14) पञ्चाङ्गानां नामानि क्रमेण लिखत । [2]

15) कति योगाः भवन्ति? नामद्वयं लिखत । [2]

## खण्डः – 'स'

16) अधोलिखितेषु कयोश्चिद् द्वयोः सूत्रयोः व्याख्या कार्या । [1½ + 1½ = 3]

क) गोत्राद्यून्यस्त्रियाम्

ख) तस्मिन्नणि च युष्माकास्मौ

ग) ग्रामजनबन्धुभ्यश्तल्

घ) राष्ट्राऽवारपाराद् घखौ

17) अधोलिखितयोः श्लोकयोः कस्यचिदेकस्य सप्रसङ्गव्याख्या कार्या । [1 + 2 = 3]

क) विपदि धैर्य मथाभ्युदये क्षमाः
सदसि वाक्पटुता, युधि विक्रमः ।
यशसि चाऽभिरुचिर्व्यं सनंश्रुतौ,
प्रकृतिसिद्धमिदं हि महात्मनाम् ।।

ख) पापान्नि वारयति योजयते हिताय,
गुह्यं निगूहति, गुणान्प्रकटीकरोति ।
आपद्गतं च न जहाति, ददातिकाले,
सन्मित्र लक्षणमिदं प्रवदन्ति सन्तः ।।

18) अधोलिखितेषु वाक्येषु केषाञ्चित् त्रयाणां संस्कृतानुवादो विधेयः । [3 × 1 = 3]

क) विद्यालय के दोनों ओर मार्ग हैं।

ख) हिमालय से गङ्गा निकलती है।

ग) माधव को खेलना अच्छा लगता है।

घ) पुत्र पिता के साथ जाता है।

ङ) सीता ने गाना गाया ।

**19)** अधोलिखितेषु केषुचित् त्रिषु वाक्येषु रेखाङ्कितपदानि संशोधयत । **[3 × 1 = 3]**

क) <u>चत्वारः</u> नार्यः गृहं गच्छन्ति ।

ख) रमेशः <u>पादात्</u> खञ्जः।

ग) <u>वृक्षस्य</u> परितः बालकाः सन्ति ।

घ) <u>गुरोः</u> नमः ।

ङ) <u>जटाभ्यः</u> मुनिः प्रतीयते ।

## <u>खण्डः – 'द'</u>

**20)** अधोलिखितेषु कौचिद् द्वौ प्रयोगौ साधनीयौ । **[2 + 2 = 4]**

क) दाक्षिः

ख) पौरवः

ग) ग्रामीणः

घ) पार्थिवः

**21)** अधोलिखितयोः गद्यांशयोः कस्यचिदेकस्य सप्रसङ्गव्याख्या कार्या । **[1 + 3 = 4]**

क) सन्यासिन्! सन्यासिन्! बहूक्तम्, विरम, न वयं दौवारिका ब्रह्मणोऽप्याज्ञां प्रतीक्षामहे । किन्तु यो वैदिकधर्मरक्षाव्रती, यश्च सन्यासिनां ब्रह्मचारिणो तपस्विनाश्च सन्यासस्य ब्रह्मचर्यस्य तपश्चान्तरायाणां हन्ता, येन च वीरप्रस विनीयमुच्यते कोङ्कणदेशभूमिः तस्यैव शिववीरस्याऽऽज्ञां वयं शिरसावहामः ।

ख) तीर्थाटनस्य सत्सङ्गस्य च व्याजेन, केचन जटिलाः परे मुण्डिनः इतरे काषायिणः, अन्ये मौनिनः, अपरे ब्रह्मचारिणश्च बहवः पटवो बटवश्चराः सञ्चरन्ति । विजयपुरादुड्डीयाऽत्राऽऽगच्छन्त्या मक्षिकाया अप्यन्तः स्थितं वयं विद्मः, किं नाम एषा यवनहतकानाम्?

**22)** अधोलिखितेषु कमप्येकं विषयमाश्रित्य निबन्धो लेखनीयः । (150 शब्दैः) **[4]**

क) भारतदेशः

ख) ममप्रियः कविः

ग) परोपकारः

घ) विद्या विहीनः पशुः

DO NOT WRITE ANYTHING HERE